| छन्दसां वृत्तिनामानि । | छन्दसां लक्षणगणाः । | छन्दसामुदाहरणानि । |
|---|---|---|
| मणिमध्यम् | स्यान्मणिमध्यं चेत् भमसाः ऽ।।,ऽऽऽ,।।ऽ | कालियभोगाभोगगतस्तन्मणिमध्यस्फीतरुचा ।<br>चित्रपदाभो नन्दसुतश्चारु ननर्त्त स्मेरमुखः ॥ |
| भुजङ्गसङ्गता | सजरैर्भुजङ्गसङ्गता ।।ऽ,।ऽ।,ऽ।ऽ | तरला तरङ्गरिङ्गितैर्यमुना भुजङ्गसङ्गता ।<br>कथमेतु वत्सचारकश्चपलः सदैव तां हरिः ॥ |
| हलमुखी | रान्नसाविह हलमुखी ऽ।ऽ,।।।,।।ऽ | |
| भद्रिका | भद्रिका भवति रो नरौ ऽ।ऽ,।।।,ऽ।ऽ | |
| दशाक्षरा वृत्तिः । पङ्क्तिः । | | |
| रुक्मवती<br>रूपवती क्वचित् । चम्पकमाला इति क्वापि । | रुक्मवती सा यत्र भमस्गाः ऽ।।,ऽऽऽ,।।ऽ,ऽ | कायमनोवाक्यैः परिशुद्धैर्यस्य सदा कंशद्विषि भक्तिः ।<br>राज्यपदे हर्म्म्यालिरुदारा रुक्मवती विप्रः खलु तस्य ॥ |
| मत्ता | ज्ञेया मत्ता मभसगयुक्ता ऽऽऽ,ऽ।।,।।ऽ,ऽ | पीत्वा मत्ता मधु मधुपाली कालिन्दीये तटवनकुञ्जे ।<br>उद्दीव्यन्तीर्व्रजजनरामाः कामासक्ता मधुजिति चक्रे ॥ |
| त्वरितगतिः | त्वरितगतिश्च नजनगैः ।।।,।ऽ।,।।।,ऽ | त्वरितगतिर्व्रजयुवतिस्तरणिसुताविपिनगता ।<br>सुररिपुणा रतिगुरुणा परिरमिता प्रमदमिता ॥ |
| मनोरमा | नरजगैर्भवेन्मनोरमा ।।।,ऽ।ऽ,।ऽ।,ऽ | तरणिजातटे विहारिणी व्रजविलासिनी विलासतः ।<br>सुररिपोस्तनुः पुनातु वः सुकृतशालिनां मनोरमा ॥ |
| शुद्धविराट् | म्सौ ज्गौ शुद्धविराडिदं मतम् ऽऽऽ,।।ऽ,।ऽ।,ऽ | |
| पणवम् | म्नौ य्गौ चेति पणवनामेदम् ऽऽऽ,।।।,।ऽऽ,ऽ | |
| मयूरसारिणी | र्जौ र्गौ मयूरसारिणी स्यात् ऽ।ऽ,।ऽ।,ऽ।ऽ,ऽ | |
| उपस्थिता | तो ज्जौ गुरुणेयमुपस्थिता ऽऽ।,।ऽ।,।ऽ।,ऽ | |
| दीपकमाला | दीपकमाला भ्मौ मता ज्गौ ऽ।।,ऽऽऽ,।ऽ।,ऽ | |
| हंसी | ज्ञेया हंसी मभनगयुता ऽऽऽ,ऽ।।,।।।,ऽ | |
| एकादशाक्षरा वृत्तिः । त्रिष्टुप् । | | |
| इन्द्रवज्रा | स्यादिन्द्रवज्रा यदि तौ जगौ गः ऽऽ।,ऽऽ।,।ऽ।,ऽ,ऽ | गोष्ठे गिरिं सव्यकरेण धृत्वा रुष्टेन्द्रवज्राहतिमुक्तवृष्टौ ।<br>यो गोकुलं गोपकुलञ्च सुस्थं चक्रे स नो रक्षतु चक्रपाणिः ॥ |
| उपेन्द्रवज्रा<br>उपेन्द्रवज्रायाः इन्द्रवज्रायाश्च चरणघटिता उपजातयः । ताश्च चतुर्व्वर्णप्रस्तारभेदादाद्यन्त्यौ त्यक्त्वा चतुर्द्दशप्रकारा भवन्ति । | उपेन्द्रवज्रा जतजास्ततो गौ ।ऽ।,ऽऽ।,।ऽ।,ऽ,ऽ<br>अनन्तरोरितलक्ष्मभाजौ<br>पादौ यदीयावुपजातयस्ताः ।<br>इत्थं किलान्यास्वपि मिश्रितासु<br>वदन्ति जातिष्विदमेव नाम ॥ | उपेन्द्रवज्रादिमणिच्छटाभिर्विभूषणानां छुरितं वपुस्ते ।<br>स्मरामि गोपीभिरुपास्यमानं सुरद्रुमूले मणिमण्डपस्थम् ॥ |
| सुमुखी | नजजलगैर्गदिता सुमुखी ।।।,।ऽ।,।ऽ।,।,ऽ | तरणिसुतातटकुञ्जगृहे वदनविधुस्मितदीधितिभिः ।<br>तिमिरमुदस्य मुखं सुमुखी हरिमवलोक्य चुचुम्ब चिरम् ॥ |
| शालिनी<br>अस्याश्चतुर्थे ततः सप्तमे च यतिः । | मात्तौ गौ चेत् शालिनी वेदलोकैः<br>ऽऽऽ,ऽऽ। ऽऽ।,ऽ,ऽ | अंहो हन्ति ज्ञानवृद्धिं विधत्ते धर्म्मं धत्ते काममर्थञ्च सूते ।<br>मुक्तिं दत्ते सर्व्वदोपास्यमाना पुंसां श्रद्धाशालिनी विष्णुभक्तिः ॥ |
| वातोर्म्मी | वातोर्म्मीयं गदिता म्भौ तगौ गः<br>ऽऽऽ,ऽ।।,ऽऽ।,ऽ,ऽ | ध्याता मूर्त्तिः क्षणमप्यच्युतस्य<br>श्रेणी नाम्नां गदिता हेलयापि ।<br>संसारेऽस्मिन् दुरितं हन्ति पुंसां<br>वातोर्म्मीपोतमिवाम्भोधिमध्ये ॥ |
| भ्रमरविलसिता<br>भ्रमरविलसितमिति केचित् । | मो गो नौ गो भ्रमरविलसिता ऽऽऽ,ऽ,।।।,।।।,ऽ | मुग्धे ! मानं परिहर न चिरात्तारुण्यन्ते सफलयतु हरिः ।<br>फुल्लावल्ली भ्रमरविलसिताभावे शोभां कलयति किमु ताम् ॥ |
| अनुकूला | स्यादनुकूला भतनगगाश्चेत् ऽ।।,ऽऽ।,।।।,ऽ,ऽ | वल्लववेशा सुररिपुमूर्त्तिर्गोपवधूनामनुकूलवर्त्तिः ।<br>वाञ्छितसिद्धै प्रणतिपरस्य स्यादनुकूला जगति न कस्य ॥ |
| रथोद्धता | रात् परैर्नरलगै रथोद्धता ऽ।ऽ,।।।,ऽ।ऽ,।,ऽ | राधिका दधिविलोड़नस्थिता कृष्णवेणुनिनदैरथोद्धता ।<br>यामुनं तटनिकुञ्जमञ्जसा सा जगाम सलिलाहृतिच्छलात् ॥ |
| स्वागता | स्वागता रनभगैर्गुरुणा च ऽ।ऽ,।।।,ऽ।।,ऽ,ऽ | यस्य चेतसि सदा मुरवैरी वल्लवीजनविलासविलोलः ।<br>तस्य नूनममरालयभाजः स्वागतादरकरः सुरराजः ॥ |